# .. Shri Shanmukhabhujangastuti ..

## ॥ શ્રીષણ્મુખભુજઙ્ગસ્તુતિઃ ॥

## Sanskrit Document Information

Text title : ShaNmukhabhujangastutiH

File name : ShaNmukhabhujangastuti.itx

Category : bhujanga

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Sivakumar Thyagarajan shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan, PSA Easwaran

Latest update : December 17, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

December 18, 2016

*sanskritdocuments.org*

# ॥ શ્રીષણ્મુખભુજઙ્ગસ્તુતિઃ ॥

ॐ શ્રીગણેશાય નમઃ ।

હ્રિયા લક્ષ્મ્યા વલ્લ્યા સુરપૃતનયાऽऽલિઙ્ગિતતનુઃ
મયૂરારૂઢોऽયં શિવવદનપઙ્કેરુહરવિઃ ।
ષડાસ્યો ભક્તાનામચલહૃદિ વાસં પ્રતનવૈ
ઇતીમં બુદ્ધિં દ્રાગચલનિલયઃ સઞ્જનયતિ ॥ ૧॥

સ્મિતન્યક્કૃતેન્દુપ્રભાકુન્દપુષ્પં
સિતાભ્રાગરુપ્રષ્ઠગન્ધાનુલિપ્તમ્ ।
શ્રિતાશેષલોકેષ્ટદાનામરદ્રું
સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૨॥

શરીરેન્દ્રિયાદાવહમ્ભાવજાતાન્
ષડૂર્મીર્વિકારાંશ્ચ શત્રૂન્નિહન્તુમ્ ।
નતાનાં દધે યસ્તમાસ્યાબ્જષટ્કં
સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૩॥

અપર્ણાખ્યવલ્લીસમાશ્લેષયોગાત્
પુરા સ્થાણુતો યોऽજનિષ્ટામરાર્થમ્ ।
વિશાખં નગે વલ્લિકાऽऽલિઙ્ગિતં તં
સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૪॥

ગુકારેણ વાચ્યં તમો બાહ્યમન્તઃ
સ્વદેહાભયા જ્ઞાનદાનેન હન્તિ ।
ય એનં ગુહં વેદશીર્ષૈકમેયં
સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૫॥

યતઃ કર્મમાર્ગો ભુવિ ખ્યાપિતસ્તં
સ્વનૃત્યે નિમિત્તસ્ય હેતું વિદિત્વા ।
વહત્યાદરાન્મેઘનાદાનુલાસી
સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૬॥

કૃપાવારિરાશિર્નૃણામાસ્તિકત્વં
દૃઢં કર્તુમદ્યાપિ યઃ કુક્કુટાદીન્ ।

ભૃશં પાચિતાન્ જીવયન્નાજતે તં
સદા ષણ્મુખં ભાવયે હૃત્સરોજે ॥ ૭॥

ભુજઙ્ગપ્રયાતેન વૃત્તેન ક્લૃપ્તાં
સ્તુતિં ષણ્મુખસ્યાદરાદ્યે પઠન્તિ ।
સુપુત્રાયુરારોગ્યસમ્પદ્વિશિષ્ટાન્
કરોત્યેવ તાન્ ષણ્મુખઃ સદ્વિદગ્ધ્યાન્ ॥ ૮॥

શ્રીજગદ્ગુરુ શ્રીશૃઙ્ગેરીપીઠાધિપ શ્રીચન્દ્રશેખરભારતી
શ્રીપાદૈઃ વિરચિતા શ્રીષણ્મુખભુજઙ્ગસ્તુતિઃ સમાપ્તા ।

Encoded by Sivakumar Thyagarajan shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan, PSA Easwaran

.. Shri Shanmukhabhujangastuti ..
was typeset using XƎLATEX 0.99996
on December 18, 2016

Please send corrections to *sanskrit@cheerful.com*